संस्कृत वार्ता:

दिनाङ्क : 07/04/2026 सायम् - 06:20

## आदौ मुख्यवार्ता:

- असम-केरल-केन्द्रशासित-पुदुचेरी-प्रदेशेषु विधानसभा-निर्वाचनस्य प्रचारः शीघ्रमेव समाप्यते।
- पश्चिमबङ्गालराज्ये विशेष-गहन-पुनरीक्षणस्य माध्यमेन पुष्टिः अभवत् यत्, प्रायः सप्तविंशति लक्षाधिकाः जनाः अयोग्याः सन्ति।
- पेट्रोल्, डीज़ल्, एल्. पी. जी., पी. एन्. जी. इत्येतेषाम् आपूर्तिः सम्पूर्णे देशे सामान्यः एव अस्ति इति प्रशासनेन उक्तम्।
- प्रशासनेन राज्येषु प्रवासीश्रमिकाणां कृते वितरणाय उपलभ्यमानानां पञ्च किलोग्राम् मुक्तव्यापारस्य एल्. पी. जी. वातीन्धनस्य दैनिक-वितरणं द्विगुणी कर्तुं निर्णयः स्वीकृतः।
- सम्पूर्णे पश्चिम-एशियादेशे संघर्षः इतोऽपि वर्धमानः अस्ति यतः इस्राएल-देशेन ह्यः इरान-देशस्य ऊर्जा-आधारित संरचनायाः उपरि आक्रमणं कृतम्।
- आई. पी. एल. क्रिकेट-क्रीडायां अद्य सायङ्काले गुवाहाट्याः बारसापारा क्रीडाङ्गणे राजस्थान रॉयल्स दलं, मुम्बई इंडियन्स इत्यमुं दलं सम्मुखी करिष्यति।

## अथ वार्ता: विस्तरेण

### विधानसभा-निर्वाचन-प्रचारः

असम-केरल-केन्द्रशासित-पुदुचेरी-प्रदेशेषु विधानसभा-निर्वाचनस्य प्रचारः अद्य सायङ्काले समाप्यते। अद्य अन्तिमहोरासु विभिन्नानां राजनैतिकदलानां प्रमुखाः नेतारः मतदातृभिः सह सम्पर्कं स्थापयितुं, एतेषु प्रदेशेषु स्वसमर्थनस्य आधारं सुदृढं कर्तुं समन्वितप्रयासान् कुर्वन्तः सन्ति।

### निर्वाचनायोग: मतदातृ-सूची

निर्वाचनायोगेन मतदातृ-सूची विशेष-गहन-पुनरीक्षणस्य अन्तर्गतं न्यायिक-समीक्षायाः अन्तर्गतं च मतदातृणां पूर्ण-सूचिः प्रकाशिता यस्मिन् पश्चिमबङ्गालराज्ये द्वात्रिंशत् लक्षाधिकाः मतदातारः योग्याः सन्ति तत्रैव प्रायः सप्तविंशति लक्षाधिकाः जनाः अयोग्याः सन्ति। प्रथमवारं मण्डलवारविवरणानि सार्वजनिक रूपेण प्रसारितानि, यत्र मतदातारः योग्याः अयोग्याः वा इति स्पष्टतया वर्गीकृताः सन्ति। प्रतिवेदनस्य अनुसारं, षष्ठी लक्षाधिकानि नामानि अधुनापि परीक्षणे आसन्।

### सर्वकारः-एल्. पी. जी.,

पेट्रोल्, डीज़ल्, एल्. पी. जी., पी. एन्. जी. इत्येतेषाम् आपूर्तिः सम्पूर्णे देशे सामान्यः एव अस्ति इति प्रशासनेन उक्तम्। अद्य नवदिल्ल्यां पश्चिम-एशियायाः वर्तमान स्थित्या: विषये अन्तामन्त्रालयीयं विवरणं सम्बोधयन्ती पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवा सुजाता शर्मा इत्येषा अवदत् यत्, कस्मिन् अपि एल्. पी. जी.-

वितरणसमवाये  शुष्कतायाः सूचना न प्राप्ता।  सा उक्तवती यत् सर्वाणि पेट्रोल्-पम्प्स् क्षेत्राणि सामान्यरूपेण प्रचलन्ति यत्र पेट्रोल्-डीज़ल् पर्याप्त मात्रायाम् उपलभ्यन्ते, तथा च अभावस्य सूचना नास्ति।  श्रीमती शर्मा अवदत् यत् एल्. पी. जी. सिलिण्डर् इत्यस्य वितरणम् अपि सुगमतया प्रचलति तथा च आनलाईन एल्. पी. जी. आरक्षण-प्रक्रिया प्राय: षण्णवति प्रतिशतं यावत् वर्धिताऽस्ति।

<u>पराष्ट्रपतिः इग्नू</u>

उपराष्ट्रपतिः सी.पी. राधाकृष्णन् वर्यः अद्य अवदत् यत् राष्ट्रस्य वास्तविक-शक्तिः तस्य जनानां ज्ञानेषु, मूल्येषु, क्षमतासु च निहितास्ति। सः अवदत् यत् इग्नू इत्यादया: संस्थाः व्यावसायिक-प्रमाणपत्रं कौशल-प्रशिक्षणं च प्रदातुं स्वस्य प्रादेशिक-केन्द्रैः माध्यमेन राष्ट्रियकौशलव्यवस्थायाः निर्माणे प्रमुखां भूमिकां निर्वहन्ति। उप-राष्ट्रपतिः अग्रे अवदत् यत् एतादृशाः प्रयत्नाः सप्तचत्वारिंशदधिक द्विसहस्रतमवर्ष पर्यन्तं विकसितभारतस्य लक्ष्यं साधयितुं साहाय्यं करिष्यन्ति। नवदिल्ल्याम् आयोजितस्य इग्नू-संस्थायाः एकोनचत्वारिंशत्तमं दीक्षान्तसमारोहं सम्बोधयन् श्री राधाकृष्णन् वर्यः अवदत् यत् (इग्नू) इति इन्दिरा-गान्धी-राष्ट्रिय-मुक्त-विश्वविद्यालयः सुलभशिक्षायाः माध्यमेन सम्पूर्णं राष्ट्रं संयोजयित्वा, शिक्षण-परिदृश्यं परिवर्तयित्वा च देशस्य गौरवम् अवाप्नोदिति।

[S/B-उपराष्ट्रपति इग्नू-21 SECS]

<u>प्रवासीश्रमिक वातीन्धन</u>

प्रशासनेन राज्येषु प्रवासीश्रमिकाणां कृते वितरणाय उपलभ्यमानानां पञ्च किलोग्राम् मुक्तव्यापारस्य एल्. पी. जी. वातीन्धनस्य दैनिक-वितरणं द्विगुणी कर्तुं निर्णयः कृतः। पेट्रोलियम तथा प्राकृतिकगैस मन्त्रालयस्य सचिवः डॉ. नीरज मित्तलः अस्मिन् विषये सर्वेषां राज्यानां केन्द्रशासितप्रदेशानां च मुख्यसचिवान् उद्दिश्य पत्रम् अलिखत्। सः अवदत् यत्, एतानि पञ्च किलोग्राम् युतानि एल्. पी. जी. वातीन्धन-कुपिकानि राज्यसर्वकारेषु, तेषां खाद्य-नागरिक-आपूर्ति-विभागेषु च केवलं स्वराज्ये प्रवासीश्रमिकानां आपूर्त्यै एव तैलविपणन-संस्थानां साहाय्येन प्रदीयन्ते।

<u>शिवराज- कृषक-कल्याण</u>

कृषि-कृषक-कल्याण-मन्त्रिणा शिवराजसिंह-चौहानेन उक्तं यत् खाद्यसुरक्षायाः सुनिश्चितता, कृषकाणां आयवृद्धिः च सर्वकारस्य सर्वोच्चप्राथमिकताः सन्ति। केन्द्रीयमन्त्री अद्य जयपुरनगरे आयोजितां क्षेत्रीयकृषि-सम्मेलनम् अभिसंबोधयन् आसीत्। सः अवदत् यत् कृषिक्षेत्रं सुदृढीकरणाय दृढः बहुआयामी च प्रयत्नाः कृताः सन्ति।

<u>श्रीगुरु तेग बहादुर्</u>

सिक्खमता-वलम्बिनां नवमः गुरो श्रीगुरुतेगबहादुर् वर्यस्य जन्मदिवसम् अमृतसरस्य गुरोः जन्मस्थाने गुरुद्वारा गुरु का महल इत्यत्र श्रद्धया भक्त्या च आचरितः। गुरुद्वारस्य गुरु-का-महल् इत्यस्य कृते श्री-हरमन्दिर-साहिब अकाल्-तख्त इत्यतः ह्यः धार्मिकयात्रा आरब्धा। उपराष्ट्रपतिः डॉ. सी.पी. राधाकृष्णन् वर्यः, प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री श्री. अमितशाहः, पञ्जाब्-राज्यस्य मुख्यमन्त्री भगवन्त-मानः च अस्मिन् अवसरे गुरु-तेग-बहादुर-वर्याय श्रद्धाञ्जलिम् अर्पितवन्तः।

## पश्चिम-एशिया-संघर्षः

सम्पूर्णे पश्चिम-एशियादेशे संघर्षः इतोऽपि वर्धमानः अस्ति। इस्राएल-देशेन ह्यः इरान-देशस्य ऊर्जा-आधारित संरचनायाः उपरि आक्रमणं कृतम्। इस्राएल-देशेन इरान-देशस्य दक्षिण-पारस-वातीन्धन क्षेत्रम् असलुयेह-नगरे आक्रमणं कृतं, यत् देशस्य बृहत्तमं वातीन्धनक्षेत्रम् आसीत्। अनेन आक्रमणेन वैश्विक-ऊर्जा-आपूर्तिषु प्रतिकारस्य, सम्भाव्यविक्षोभस्य च आशङ्काः उत्पद्यन्ते।

## जयशङ्करः

विदेशमन्त्री डॉ. एस्. जयशङ्करः अद्य सेण्ट् किट्स् तथा नेविस् इत्यस्य विदेशमन्त्रिणा डॉ. डेन्जिल एल. डग्लस इत्यनेन सह मिलितवान्। सामाजिकान्तर्जालीये सन्देशे डॉ. एस जयशङ्करः अवदत् यत् उभौ नेतारौ विकास-परियोजनायाः, स्वास्थ्य-सहकारस्य, डिजिटल-क्षमतायाः, आपत्-प्रतिक्रियायाः च विषये चर्चितवन्तौ। डॉ. जयशङ्करः क्षेत्रीयाणां वैश्विकानां च विषयेषु मतानां आदानप्रदानस्य प्रशंसाम् अपि अकरोत्।

## आई. पी. एल.

आई. पी. एल. क्रिकेट-क्रीडायां अद्य सायङ्काले गुवाहाट्याः बारसापारा क्रीडाङ्गणे राजस्थान रॉयल्स दलं, मुम्बई इंडियन्स इत्यमुं दलं सम्मुखी करिष्यति। क्रीडा सायं सार्द्ध सप्तवादने आरभ्यते। तत्रैव, गतरात्रौ कोलकाता-नगरस्य ईडन-गार्डन्स इत्यत्र कोलकाता-नाईट-राईडर्स तथा पञ्जाब-किङ्ग्स इत्येतयोः दलयोः मध्ये क्रीडा वृष्ट्या बाधिता।

॥ इति वार्ताः ॥